सम्राहं भक्षितं कुर्य्यान्महैश्वर्य्यं मात परम् ॥”)
ब्रह्मीशाकस्य पर्य्यायान्तरं यथा। सरस्वती ५
सौम्या ६ सुरश्रेष्ठा ७ सुवर्च्चला ८ कपोतवेगा ९
वैधात्री १० दिव्यतेजाः ११ महौषधी १२
स्वायम्भुवी १३ सौम्यलता १४ सुरेष्टा १५
ब्रह्मकन्यका १६ मण्डूकमाता १७ मण्डूकी १८
सुरसा १९ मेध्या २० वीरा २१ भारती २२
वरा २३ परमेष्ठिनी २४ दिव्या २५ शारदा २६।
अस्या गुणाः। हिमत्वम्। कषायत्वम्।
तिक्तत्वम्। वातास्रपित्तनाशित्वम्। बुद्धिप्रज्ञा-
मेधाकारित्वम्। आयुर्वर्द्धकत्वञ्च। इति राज-
निर्घण्टः ॥ अपि च।

“ब्राह्मी कपोतवल्ली स्यात् सोमवल्ली सरस्वती ॥”
अथ ब्रह्ममाण्डूकी।
“मण्डूकपर्णी माण्डूकी त्वाष्ट्री दिव्या महौ-
षधी ॥”
अस्या गुणाः।
“ब्राह्मी हिमा सरा तिक्ता लघुर्मेध्या च
शीतला।
कषाया मधुरा स्वादुपाकायुष्या रसायनी ॥
स्वर्य्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्रकासजित्।
विषशोथज्वरहरी तद्वन्मण्डूकपर्णिनी ॥”
इति भावप्रकाशः ॥ * ॥

फञ्जिका। वामनहाटी इति भाषा। पङ्क-
गड्मत्स्यः। पाँकाल इति भाषा। सोमवल्लरी।
सोमलता इति ख्याता। इति मेदिनी ॥
महाज्योतिष्मती। वड़ी मालकङ्गनी इति
हिन्दी भाषा। मत्स्याची। मच्छाक्षी इति
कछमछरिया इति च हिन्दी भाषा। वाराही-
कन्दः। छिलमोचिका। इति राजनिर्घण्टः ॥
हिंचा इति भाषा। रोहिणीनक्षत्रम्। इति
हेमचन्द्रः ॥ (ब्रह्म + अण् + ङीप्।) ब्रह्माधि-
ष्ठातृदेवताकत्वात् तथात्वम् ॥ सूर्य्यमूर्त्तिः।
यथा, मार्कण्डेये। १०९। ७१।
“ब्राह्मी माहेश्वरी चैव वैष्णवी चैव ते तनुः।
त्रिधा यस्य स्वरूपन्तु भानोर्भास्वान् प्रसीदतु ॥”
त्रि, ब्रह्मप्राप्तियोग्या। यथा, मनुः। २। २८।
“स्वाध्यायेन व्रतैर्होमै स्त्रैविद्येनेज्यया सुतैः।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥”)
ब्रह्मभवा। यथा गीतायाम्। २। ७२।
“एषा ब्राह्मी स्थितिः पार्थ! नैनां प्राप्य
विमुह्यति ॥”)

ब्राह्मीकन्दः, पुं, (ब्राह्म्याः कन्द इव कन्दो यस्य।)
वाराहीकन्दः। इति राजनिर्घण्टः ॥

ब्राह्म्यं, क्ली, विस्मयः। डम्बम्। इति धरणिः ॥
(ब्रह्मण इदम्। ब्रह्मन् + ष्यञ्।) ब्रह्मसम्बन्धिनि
त्रि। (यथा, मार्कण्डेये। ६। ३८।
“चतुर्द्दश गुणो ह्येष कालो ब्राह्म्यमहः
स्मृतम् ॥”)
निर्यकारब्राह्मणशब्दार्थोऽप्यत्र ॥ (यथा, रघुः।
१२। ८७।
“ब्राह्मणस्य प्रियाशोकशल्यनिष्कर्षणौषधम् ॥”)

ब्रुवन् [त्] त्रि, (ब्रवीतीति। ब्रू + शतृ।) कथयन्।
वक्ता। यथा,—
“कृते निःसंशये पापे न भुञ्जीतानुपस्थितः।
भुञ्जानो वर्द्धयेत् पापमसत्यं संसदि ब्रुवन् ॥”
इति प्रायश्चित्ततत्त्वम् ॥

ब्रुवाणः, त्रि, (ब्रूते इति। ब्रू + शानच्।) वक्ता।
यथा,—
“इति ब्रुवाणो मधुरं हितञ्च
तमाश्रिष्टश्लेथिलयज्ञभूमिम्।
रामं मुनिः प्रीतिमना मखान्ते
यशांसि राज्ञां निजिघृक्षयिष्यन् ॥”
इति भट्टिः। २। ४० ॥

ब्रू ल ञ उक्तौ। इति कविकल्पद्रुमः ॥ (अदा०-
उभ०-द्विक०-सेट्।) ल ञ ब्रवीति। ब्रूते।
विब्रूतिः कटके कृतेत्यत्र अरविहितकार्य्य-
स्थानित्वत्वान्न वचादेशः। इति दुर्गादासः ॥

---

## भ

भ भकारः। स च व्यञ्जनचतुर्विंशतितमः पवर्गीय-
चतुर्थो वर्णः। अस्योच्चारणस्थानं चोष्ठः।
इति व्याकरणम् ॥ (तथा च सिद्धान्तकौमुद्याम्।
उपूपध्मानीयानामोष्ठौ ॥”) तस्य स्वरूपादि
यथा,—
“भकारं शृणु चार्व्वङ्गि! स्वयं परमकुण्डली।
महामोक्षप्रदं वर्णं तरुणादित्यसंप्रभम् ॥
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा।”
इति कामधेनुतन्त्रम् ॥
(वङ्गाक्षराकृतौ) तस्य लिखनक्रमो यथा,—
“ऊर्द्धाधःक्रमतो रेखा वामे वक्रा तु कुण्डली।
पुनश्चाधोगता सैव अत ऊर्द्ध्वगता पुनः ॥
ब्रह्मा शम्भुश्च विष्णुश्च क्रमतस्तासु तिष्ठति ॥”
अस्य लेखनप्रकारान्तरं यथा,—
“किञ्चिदाकुञ्चिता रेखा वामदक्षिणतो गता।
ततो वक्रा वामगता तासु वाण्यादयः क्रमात् ॥
ऋजुमात्रा मध्यगता कोणादूर्द्ध्वगता पुनः।
महाशक्तिस्वरूपा सा ध्यानमस्य प्रचक्षते ॥”
तद्यथा,—
“तडित्प्रभां महादेवीं नागकङ्कणशोभिताम् ॥
षड्भुजां वरदां भीमां रक्तपङ्कजलोचनाम् ॥
रक्तवस्त्रपरीधानां रक्तपुष्पोपशोभिताम्।
चतुर्वर्गप्रदां देवीं साधकाभीष्टसिद्धिदाम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥”
तत्प्रणाममन्त्रो यथा,—
“त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये!।
आत्मादितत्त्वसंयुक्तं भकारं प्रणमाम्यहम् ॥”
इति वर्णोद्धारतन्त्रम् ॥
तस्य नामानि यथा,—
“भः क्लिन्नाभ्रमरो भीमो विश्वमूर्त्तिर्निशाभवम्।
द्विरण्डो भूषणो मूलं यज्ञसूत्रस्य वाचकः ॥
नक्षत्रं भ्रमणा दीप्तिर्वयो भूमिः पयो नभः।
नाभिर्भद्रं महाबाहुर्विश्वमूर्त्तिर्वितारुकः ॥
प्राणात्मा तापिनी वत्सा विश्वरूपी च चन्द्रिका।
भीमसेनः सुधासेनः सुखो मायापुरं हरः ॥”
इति नानातन्त्रशास्त्रम् ॥

भं, क्ली, (भातीति। भा दीप्तौ + बाहुलकात् डः।)
नक्षत्रम्। इत्यमरः। १। ३। २१ ॥ (यथा,
सूर्य्यसिद्धान्ते। १। २६।
“प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः।
परिणाहवशाद्भिन्ना तद्वशाद् भानि भुञ्जते ॥”)
ग्रहः। इति शब्दरत्नावली ॥ राशिः। यथा,—
“राशिनामानि च क्षेत्रं भन्दयं गृहनाम च ॥”
इति ज्योतिस्तत्त्वम् ॥

भः, पुं, (भातीति। भा दीप्तौ + बाहुलाद् डः।)
शुक्राचार्य्यः। इति मेदिनी। भे, १ ॥ भ्रमरः।
इत्येकाक्षरकोषः। भ्रान्तिः। इति शब्दरत्ना-
वली ॥

भक्तं, क्ली, (भज्यते स्मेति भज सेवायां + कर्म्मणि
क्तः।) अन्नम्। इत्यमरः। २। ९। ४८ ॥
अथ भक्तस्य नामानि साधनं गुणाश्च।
“भक्तमन्नं तथान्धश्च क्वचित् कूरश्च कीर्त्तितम्।
ओदनोऽस्त्री स्त्रियां भिस्सा दीदिविः पुंसि
भाषितः ॥”
सुधौतांस्तण्डुलान् स्फीतांस्तोये पञ्चगुणे पचेत्।
तद्भक्तं प्रस्रुतञ्चोष्णं विशदं गुणवन्मतम् ॥
भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु।
अधौतमस्रुतं शीतं गुर्व्वरुच्यं कफप्रदम् ॥”
इति भावप्रकाशः ॥
हरये निवेदितान्नस्य नित्यं भक्षणे फलं यथा,
“ये विप्रा हरये दत्त्वा नित्यमन्नञ्च भुञ्जते।
उच्छिष्टभोजनात्तेषां हरेर्दास्यं लभेन्नरः ॥”
हरये अदत्त्वा तद्भक्षणे दोषो यथा,—
“न दत्त्वा हरये भक्त्या भुञ्जते चेद्भ्रमादपि।
पुरीषसदृशं वस्तु जलं मूत्रसमं भवेत् ॥*॥
शूद्रश्चेद्धरिभक्तश्च नैवेद्यभोजनोत्सुकः।
आमान्नं हरये दत्त्वा पाकं कृत्वा च खादति ॥”
अन्नदानफलं यथा,—
“अन्नञ्च सर्व्वजीवेभ्यः पुण्यार्थं दातुमर्हति।
दत्त्वा विशिष्टजीवेभ्यो विशिष्टं फलमाप्नुयात् ॥
अतो दत्त्वा मानुषेभ्यो लभतेऽष्टगुणं फलम्।
ततो विशिष्टशूद्रेभ्यो दत्त्वा तद्द्विगुणं फलम् ॥
दत्त्वान्नं वैश्यजातिभ्यस्ततश्चाष्टगुणं फलम्।
दत्त्वान्नं क्षत्रियेभ्योऽपि वैश्यानां द्विगुणं भवेत् ॥
क्षत्रियाणां शतगुणं विप्रेभ्योऽन्नं प्रदाय च।
विप्राणाञ्च शतगुणं शास्त्रज्ञे ब्राह्मणे फलम् ॥
शास्त्रज्ञानां शतगुणं भक्ते विप्रे लभेद्ध्रुवम्।
स चान्नं हरये दत्त्वा भुङ्क्ते भक्त्या च
सादरम् ॥
विष्णवे भक्तविप्राय दत्त्वा दातुश्च यत् फलम्।
तत् फलं लभते नूनं भक्तब्राह्मणभोजने ॥
भक्ते तुष्टे हरिस्तुष्टो हरौ तुष्टे च देवताः।
भवन्ति सिक्ताः शाखाश्च यथा मूलनिषे-
चनात् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २१ अध्यायः।